# अभ्यासपत्रक

## संस्कृतम्

अवधिः - होरात्रयम् | कक्षा - षष्ठी | पूर्णांकाः - अशीतिः

दिनांकः - ००.०८.२०२३ (वासरः)

विद्यार्थिनः नाम ........................................................................................ वर्गः ..........

**निर्देशाः -**
- **सर्वे प्रश्नाः अनिवार्याः सन्ति ।**
- **प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।**
- **प्रश्नपत्र चतुर्भागेषु विभक्तमस्ति अतः भागानाम् उल्लेखः करणीयः ।**

## खण्डः क (अपठितावबोधनम् - ०५ अंकाः)

**प्र.१ अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

जनकस्य जनकः पितामहः भवति । अम्बायाः जनकः मातामहः भवति । जनकस्य माता पितामही भवति। अम्बायाः माता मातामही भवति । जनकस्य अनुजः पितृव्यः भवति पितृव्यस्य भार्या पितृव्या भवति। अम्बायाः भ्राता मातुलः भवति । मातुलस्य भार्या मातुलानी भवति । पुत्रस्य पुत्रः पौत्रः भवति। पुत्राः पौत्राः च प्रातः पितामहं पितामहीम् च नमन्ति । पितामहः वदति-पुत्रेभ्यः पौत्रेभ्यः च स्वस्ति। भीष्मः अपि पाण्डवानाम् कौरवाणाम् च पितामहः आसीत्।

**क)** एकपदेन उत्तरत। (एक पद में उत्तर दीजिए ।) **(1×2=2)**

(क) जनकस्य अनुजः कः भवति?

(ख) पितृव्यस्य भार्या का भवति?

**ख)** एकवाक्येन उत्तरत । (एक वाक्य में उत्तर दीजिए ।) **(1×2=2)**

(क) प्रातः पुत्राः पौत्राः च किम् कुर्वन्ति?

(ख) पितामहः किम् वदति?

**ग)** यथानिर्देशम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।) **(½×2=1)**

(क) 'भवति' इति पदे कः धातुः अस्ति?

(i) भू (ii) भव् (iii) भ

(ख) अनुच्छेदे 'अम्बायाः' इति पदे का विभक्ति प्रयुक्ता?

(i) चतुर्थी (ii) पंचमी (iii) षष्ठी

## खण्ड - ख (रचनात्मककार्यम् - १५ अंकाः)

**प्र.२ अधोलिखितं वार्तालापं मञ्जूषातः पदं चित्वा पूरयत -** **(1×5=5)**

**मञ्जूषा -** पितृव्यः, भ्राता, सह, क्रीडनाय, वयम्, क्रीडाक्षेत्रम्, आगमिष्यति, पितृव्या, स्तः, क्रीडिष्यामः|

अर्चना - अद्य सोमवासरः अस्ति किम् पितृव्यः अद्यः गृहे ( 1) .....................?

वन्दना - नहि ( 2) ..........................तु श्वः मंगलवासरे एव आगमिष्यति ।

अर्चना - किम् पितृव्या अपि तेन ( 3) .......................... आगमिष्यति ?

वन्दना - आम् तेन सह ( 4) ..........................अपि आगमिष्यति ।

अर्चना - तर्हि तु मम भगिनी तान्या (5)......दीपकः च अपि आगमिष्यतः ।
वन्दना - शोभनम्। वयम् सर्वे मिलित्वा (6) ............ क्रीडाक्षेत्रम् गमिष्यामः ।
अर्चना - आम् ! तत्र च पादकन्दुकेन (7) ..........................|
वन्दना - मम समीपे कैरमबोर्ड; शतरंज : चापि (8) ..........................|
अर्चना - प्रथमम् तु (9) ..........................शतरंज : एव क्रीडिष्यामः ।
वन्दना - तर्हि सायंकाले एव (10) .......................... गमिष्यामः ।

**प्र.३ चित्रं दृष्ट्वा मञ्जूषायाः शब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत –** **(2x5=10)**

| **मञ्जूषा –** | पाकशाला, सूदः, माता, पचति, सन्ति, अस्ति, नयति, जलम्, भोजनम्, आम्राणि, गच्छति, पाकशालायाम्, पिबति, अत्र । |
|---|---|



## खण्ड – ग (अनुप्रयुक्तव्याकरणम् – २० अंकाः)

**प्र.४ रेखांकितपदानि आधृत्य वाक्यानि शुद्धं कुरुत –** **(1×5=5)**

क) बालकः कुत्र **गच्छतः ?** ख) तौ न **पठन्ति ।** ग) यूयम् **हसथः ।**

घ) अश्वाः तीव्रम् **धावसि ।** ङ) अहम् रोटिकाम् **खादामः ।**

**प्र.५ अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत –** **(1×5=5)**

क) वे सब गिरते हैं । ख) वह पढ़ती है ।

ग) मैं लिखता हूँ । घ) हम सब दौड़ते हैं । ङ) तुम दोनों नाचते हो ।

**प्र.६ शब्दरूपाणि लिखत –** **(1×5=5)**

| **विभक्ति** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा – | रमा | रमे | (१)............. |
| द्वितीया – | रमाम् | रमे | रमाः |
| तृतीया – | भोजनेन | भोजनााभ्याम् | (२)............. |
| चतुर्थी – | (३)............ | गृहाभ्याम् | गृहेभ्यः |
| पञ्चमी – | (४)............ | वृक्षाभ्याम् | वृक्षेभ्यः |
| षष्ठी – | फलस्य | फलयोः | (५)............. |
| सप्तमी – | गृहे | गृहयोः | गृहेषु |

**प्र.७ धातुरूपाणि लिखत -** **(1×5=5)**

| पुरुषः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम - | धावति | (१)............ | (२)............. |
| मध्यम - | खादसि | (३)......... | खादथ |
| उत्तम - | (४)............ | गच्छावः | (५)............ |

## खण्ड - घ (पठितावबोधनम् - ४० अंकाः)

**प्र.८ अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

भारतस्य तिसृषु दिशासु समुद्रतटाः सन्ति। अस्माद् एव कारणात् भारतदेशः प्रायद्वीपः इति कथ्यते। पूर्वदिशायां बङ्गोपसागरः, दक्षिणदिशायां हिन्दमहासागरः पश्चिमदिशायां च अरबसागरः अस्ति। एतेषां त्रयाणाम् अपि सागराणांसङ्गमः कन्याकुमारीतटे भवति। अत्र पूर्णिमायां चन्द्रोदयः सूर्यास्तं च युगपदेव द्रष्टुं शक्यते।

**१) एकपदेन उत्तरत -** **(½×4=2)**

अ) कस्य तिसृषु दिशासु समुद्रतटाः सन्ति?

ब) भारतस्य पूर्वदिशायां कः सागरः अस्ति ?

स) हिन्दमहासागरः कुत्र अस्ति ?

द) भारतस्य पश्चिमदिशायां कः सागरः अस्ति ?

**२) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) त्रयाणाम् अपि सागराणांसङ्गमः कुत्र भवति ?

ब) भारतस्य तिसृषु दिशासु के सन्ति ?

**३) निर्देशानुसारं उत्तरत -** **(½×2=1)**

अ) 'अरबसागरः अस्ति' अत्र क्रियापदं किम् अस्ति ?

ब) "चन्द्रोदयः सूर्यास्तं च " अत्र कः अव्ययः अस्ति ?

क) च  ख) चन्द्रोदयः  ग) सूर्यास्तं

**प्र.९ अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

पिबन्ति पवनं जलं सन्ततम् । साधुजना इव सर्वे वृक्षाः ।।३।।
स्पृशन्ति पादैः पातालं च । नभः शिरस्सु वहन्ति वृक्षाः ।।४।।
पयोदर्पणे स्वप्रतिबिम्बम् । कौतुकेन पश्यन्ति वृक्षाः ।।५।।
प्रसार्य स्वच्छायासंस्तरणम् । कुर्वन्ति सत्कारं वृक्षाः ।।६।।

**१) एकपदेन उत्तरत -** **(1×2=2)**

अ) के सत्कारं कुर्वन्ति ?

ब) स्वप्रतिबिम्बम् के पश्यन्ति ?

२) **पूर्णवाक्येन उत्तरत –** **(1×2=2)**

अ) के सर्वे साधुजनाः इव सन्ति ?

ब) वृक्षाः कैः पातालं स्पृशन्ति ?

३) **निर्देशानुसारं उत्तरत –** **(½×2=1)**

अ) 'वायुम्' इति पदस्य किं पर्यायपदम् पद्यांशे अस्ति ?

क) पवनं ख) हवां ग) अनलः

ब) 'कौतुकेन' इति पदे का विभक्तिः अस्ति ?

क) षष्ठी ख) तृतीया ग) पंचमी

**प्र.१० अधोलिखितानां प्रश्नानामुत्तराणि लिखत –** **(1×5=5)**

क) बालकाः बालुकाभिः किं रचयन्ति ?

ख) शृगालस्य मित्रं कः आसीत् ?

ग) वृक्षाः किं रचयन्ति?

घ) शृगालस्य स्वभावः कीदृशः भवति ?

ङ) भारतस्य दीर्घतमः समुद्रतटः कः ?

**प्र.११ उचितां विभक्तिं प्रयुज्य वाक्यानि रचयत –** **(1×5=5)**

क) अहं .......................... खादामि। (रोटिका)

ख) वृक्षाः .......................पिबन्ति। (पवन)

ग) अश्वाः .................. सह धावन्ति। (अश्व)

ग) मृगाः ..................सह चरन्ति । (मृग)

ङ) ताः ...................... लिखन्ति। (कथा)

**प्र.१२ मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

**मञ्जूषा –** **अपि, प्रायद्वीपः कदा, प्रातः, ।**

क) ..................भ्रमणं स्वास्थ्याय भवति ।

ख) त्वं ................ मातुलगृहं गमिष्यसि ?

ग) भारतदेशः .................. इति कथ्यते ।

घ) दिनेशः विद्यालयं गच्छति, अहम् ................ तेन सह गच्छामि ।

**प्र.१३ मञ्जूषातः कर्तृपदं चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

**मञ्जूषा –** **सिंहाः, पुष्पम्, अहम्, लेखिका ।**

क) ..................पठामि । ख) .................विकसति।

ग) ............... लिखति । घ) .................गर्जन्ति ।

**प्र.१४ मञ्जूषातः क्रियापदं चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

**मञ्जूषा – उत्पतति, गायतः, पश्यन्ति, पश्यथ ।**

क) बालिके ..............।

ख) यूयं..................।

ग) खगः..................।

घ) जनाः ..................।

**प्र.१५ निर्देशानुसारं वचनपरिवर्तनम् कुरुत –** **(1×4=4)**

क) मयूरः नृत्यति । (बहुवचने) ............... ...............

ख) युवां क्रीडथः । (एकवचने) ............... ...............

ग) छात्रे लिखतः । (बहुवचने) ............... ...............

घ) एतानि यानानि ।(द्विवचने) ............... ...............

**प्र.१६ वर्णसंयोजनं / विच्छेदं वा कुरुत –** **(1×4=4)**

क) म् + अ + य् + ऊ + र् + औ = ............................।

ख) प् + अ + र् + ण् + आ + ण् + इ = ...........................।

ग) क् +उ+ .................. + च् + इ + क् + औ = कुञ्चिका।

घ) ध् + आ + व् + इ + क् + .................. = धाविकाः ।